अथ पङ्क्तिकपदार्थलक्षणम्

पियाली पलित

अत्र पङ्क्तिकपदार्थो विचार्यते। स च प्राधान्येन त्रिविधः-कालिक-देशिक-बौद्धिकभेदेन। तत्र एक एव पदार्थो नानासमवायप्रतियोगी भूत्वा महज्जगज्जालं रचयतीति नव्यनैयायिकानां मतं, यच्च प्राचीनैः नोल्लिखितम्। कणादकल्पितमेव वस्तुनिचयम् अनुचिन्त-यद्भिः नव्यैः आकारतो धर्मधर्मिभावमवलम्ब्य उपस्थाप्यते एतत् पङ्क्तिकपदार्थलक्षणमिति आधुनिकशैल्याऽत्र निबन्धे निरूप्यते।

निधाय हृदि विश्वेशं विधाय गुरुवन्दनम्।
पङ्क्तिकपदार्थलक्षणं क्रियते धर्मार्थिभिः॥

अथ हृत्पदं मनःपरम्। जन्यत्वं सप्तम्यर्थः। अन्वयश्चास्य निधाने। निधानं ज्ञानविशेषः। विश्वेशम् इति द्वितीयार्थो विषयत्वम्। तथा च विश्वेशविषयक-मनोजन्य-ज्ञानविशेषोत्तरकालीना या कृतिरिति केचित्। तन्न। ज्ञानमात्रस्य मनोजन्यत्वेन मनोजन्यत्वार्थस्य हृदीत्यस्याव्यावर्तकतापत्तेः। किन्तु हृत्पदं हृदयरूपशरीरावयवपरम्। निधानं धात्वर्थः। तच्चावस्थापनमवस्थितत्वारोपणम्। तथा च अवस्थितत्वप्रकारक-आहार्यज्ञानोत्तरकालीना या कृतिः इत्यन्वयबोधः। हृदीत्यत्र सप्तम्यर्थो निरूपितत्वम्। तस्यावस्थितत्वे अन्वयः। विश्वेशम् इत्यत्र द्वितीयार्थो विशेष्यत्वम्। तथा च विश्वेशविशेष्यक-हृदयनिरूपितवृत्तित्वप्रकारक-आहार्यज्ञानोत्तरकालीना या कृतिः इत्यन्वयः। अथ गुर्वादिस्मरणानन्तरम् पङ्क्तिकपदार्थलक्षणं अभिनवनव्यवैशेषिकतत्त्वं विव्रियते अस्मदाचार्येण नवज्योतिसिंहेन वैश्वामित्रेण विज्ञाननिधिना।

अथ नव्य-वैशेषिकैः पदार्थधर्मपरिस्फुटनार्थं प्रथमतः आधुनिकज्यामितिग्राह्यं शेप् फर्म् (Form), पयेन्ट् (Point) इत्यादिविषयकमालोचनं क्रियते। तत्र यदा कश्चित् गोलाकारः समतलवृत्तिः भवति तदा तयोः संयोगः बिन्दुमात्रप्रदेशं व्याप्नोति। तत्संयुक्तप्रदेशनिष्ठवृत्तितानिरूपकविन्दुः स्वयम् अप्रदेशवृत्तिः पयेन्ट् इति पदेन

उल्लिख्यते। संयोगस्तु प्रदेशवृत्तिरेव। फर्म् इति पदेन परिपूर्णाकारः संस्थानविशेषः कश्चिदुपलभ्यते यस्तु **स्वरूपतः बौद्धिक बुद्धिनिष्ठः** न प्राचीनसम्मतभावपदार्थेषु अन्तर्भावितः। शेप् इति पदेन **पदार्थगत-आकारविशेषः बुद्धौ भासमानः** उल्लिख्यते। सर्वमेतत् केवलं गणितसाधनम् न वेति आह न। यथार्थव्यवहारस्थलेऽपि एतेषां सम्यक् प्रयोजकत्वात्। तद्यथा तन्त्रयुक्तौ अनुमितौ वा यत् युक्तिसङ्ग्रहादि क्रियते तेषाम् सविषयकत्वात् विशेष्यविशेषणभाववत्तया विशिष्टसम्बन्धनिरूपणत्वात् दार्ष्टान्तिकस्थलीयत्वाच्च। सर्वमेतत् **आइडियल्** (Ideal) तथा **बुद्धिनिरूपित-वृत्तित्वप्रकारक-आहार्यज्ञानविषयमात्रमिति** मतम्। वस्तुगत्या हि सर्वे पदार्थाः एतेषां बुद्धिनिष्ठानाम् अनुकाराः तत्त्वानि इति प्रतीयन्ते। यथार्थानुकारयोः स्वरूपतः भेदवत्त्वेऽपि तदाकारोपहितत्वात् भेदग्रहणं दुष्करमेव। गोलक-गोलाकारवत् चक्र-चक्राकारवत् रेखा-रेखाकारवद्वा। एवं सति कथमस्य परिज्ञानं भवति - आकारात् आकारविशिष्टस्य आकारविशिष्टात् आकारस्य वा। तदा ब्रूमः प्रायिकमेतत् वचनम्। प्रकृतिवशात् ईश्वरज्ञानविषयतावशात् बीजाङ्कुरादिवदनादिसृष्टिवैचित्र्यदर्शनात् पौरुषेयव्यवहारप्रवृत्तिवशात् च। **तथा हि ययोः कयोश्चित् बौद्धिकपदार्थयोः संबन्धः बाह्यपदार्थसंसर्गं विनाऽपि भवितुमर्हति। यथा गोल-समतलयोः जगत्-सृष्ट्योर्वा। न चैतत् स्वाप्नविषयवत् मिथ्या शशविषाणादिवत् वा तुच्छम्। तुच्छविषयाणां संसर्गात्यन्ताभावात् स्वाप्नादीनां मनोविजृम्भणमात्रत्वाच्च।** एतेषां बौद्धिकपदार्थानां वैशेषिकसम्मतषट्पदार्थेषु अन्तर्भावः इष्यते न वा। एते खलु बुद्धिविषयाः आत्मधर्माः इति मन्यते। बुद्धेः आत्मधर्मत्वम् सविषयकत्वं च तैः अंगीकृतमेव। यदा किञ्चिद् गोलाकारद्रव्यम् अस्मद्बुद्धिषु वर्तते तदा तद्द्रव्यगत-परिमाणादिधर्मा अपि बुद्धौ भासन्ते। अतस्तेषां गोलाकाराणां परिमाणादिगुणपदार्थे अन्तर्भावः कथं न स्यात्। उच्यते न स्यात्। आकारस्य द्रव्यगतपरिमाणप्रयोजकत्वात्। आकारभाव्यं हि परिमाणम्। उक्तं च प्रशस्तपादभाष्ये - परिमाणं मानव्यवहारकारणम्। तच्चतुर्विधम् - अणु महद् दीर्घम् ह्रस्वं वेति। मानं मानव्यवहारश्च आकारम् आश्रित्यैव भासमानं भवति। भवतु तावत्। सर्वमेतत् अपेक्षाबुद्धिविषयं न वा संख्यादिवत्। नैतद् वाच्यम्। संख्यापरिमाणादीनाम् अपेक्षाबुद्धिविषयत्वं एकैकबाह्यविषयनिरूपितं भवति। परन्तु अपेक्षाबुद्धिः परत्वापरत्वसंख्यादीन् विषयीकुर्वन्नेव प्रवर्तते। न तस्याः स्वातन्त्र्यमस्ति वा। आकारादीनां तु स्वविषय-कानुभवकाले यद्यद्विषये अनुभवः जायते तत्तद्विषये तेषाम् आरोपणं परिलक्ष्यते। धर्मसारूप्यात् बाह्येऽर्थे तदनुकाराः अनुभूयन्ते इति विशेषः। तथा हि - बुद्धिगत-दार्ष्टान्तिकाः वस्तुतः मानसविनिर्माणम् प्राकृतिकनियमानुसारि-कल्पितविषयाः हृत्कल्पितपरमेश्वरवत्। तद्विग्रहास्तु प्रत्यक्षपूजार्चादिव्यवहारविषयाः आलम्बनप्रतीति-विषयाः वेति लभ्यन्ते। प्राचीनैः आकारादयः गुणपदार्थेषु न प्रकीर्तिताः। गुणाः

द्रव्यवृत्तयः आकारास्तु द्रव्यविशेष-आश्रितत्वेऽपि तदधिकविस्तारवृत्तयः सन्ति। ननु आकाराः अवयवसंस्थानविशेषाः अवयवातिरिक्तावयविवत् इति कथं न उच्येत। न तथा। संस्थानविशेषाणाम् संयोगमात्रत्वात्। आकारस्तु संयोगातिरिक्तपदार्थविशेषः। स च द्रव्यनिष्ठसंयोगभाव्यत्वे सति संयोगातिरिक्त-अभिनव-पदार्थाविशेषः। एवमपि वक्तुं शक्यते - परिपूर्णाकारादयः ज्ञानाकाराः प्राचीनवैशेषिकसम्मतचतुर्विंशति-गुणातिरिक्ताः उपाधिविशेषाः स्युः। यद्वा अन्तिमसंयोगपर्यन्तं मूर्तानां समाप्ति-अवच्छेदवृत्ति-संयोगपर्यन्तमात्रवृत्तिः विभाजक-उपाधिविशेषः स्यात्। आधार-आधेयभावाश्च आकारादिवत् औपाधिकाः बौद्धिकपदार्थाः एव। सर्वे एते निरूप्यनिरूपकभाववन्तः आहार्यज्ञानविषयाः उपाधयः वृत्त्यनियामकसम्बन्धविशिष्टाश्च भवन्ति। वस्तुनि तेषां अयुतसंबन्धनियमितवृत्तित्वं नास्त्येव। वस्तुतः स्वगतं धर्मम् अपरे आरोपयति उपादधाति वा इति उपाधिलक्षणम्। अस्ति च उपाधेः अपरः विशेषः यदेषः आरोपितयोः वस्तुनोः सम्बन्धं निरूप्यनिरूपकभाववत्त्वं वा प्रकाशयति। यद्वा विभाजकत्वे सत्यपि औपाधिकसाधर्म्यवैधर्म्यनिरूपणेन पदार्थकोटिसंग्राहकः भवति। यथा– नित्यत्वे सति अन्यद्रव्यानारब्धकत्वे सति अनाश्रिताश्रयत्वम् अन्त्यद्रव्यत्वम् यथा आकाश- काल-दिक्-मनांसि। संयोगविभागकारणतावच्छेदकत्वं द्रव्यत्वम् इति च। तत्र पदार्थविभाजक-उपाधयः पदार्थविभागे निमित्तीभूत्वा लक्षणप्रवर्तकाः भवन्त्येव इत्येतेषां महदाशयः। यथा– द्रव्यत्ववत्त्वमिति द्रव्याणां सामान्यलक्षणे स्थितेऽपि आत्माश्रयदोषभयात् क्रियागुणसमवायिकारणत्वं द्रव्यत्वमिति विशिष्टलक्षणं पदार्थविभाजक-उपाधिं द्वारीकृत्य तत्प्रयुक्ताः मनुष्यत्वमात्रविशिष्टेषु स्त्रीत्व-पुंस्त्व-ब्राह्मण-क्षत्रियादि-उपाधि-प्रवर्तिताः विभागाः प्रामाणिका एव। अथवा एवमपि वक्तुं शक्यते – कार्य।। कारण-ग्राह्य।। ग्राहक - आधार।। आधेयादिभाव-प्रयोजक-संयोगादिसंबन्धम् आकारयति इति आकारः शेप्। अथ मूर्तामूर्तयोः आकारभेदः अस्ति न वा। अवश्यमस्ति। यथा अमूर्तत्वे सत्यपि यज्ज्ञानाकारः प्रतीयते स परिभाषायां प्रकार इति व्यवह्रियते। तेन च कश्चित् ज्ञानीय-विशेष्य-विशेषण-भावः प्रतिष्ठाप्यते। एवं सर्वव्यवहारमूलः धर्म-धर्मि-भावः उपाधिवशात् विशिष्टभावे पर्यवस्यते। उपाधित्वं स्वयं तु अनाश्रित-आश्रयत्वमिति बोद्धव्यम्। प्राचीनवैशेषिकमते आकारादीनां बुद्ध्यनतिरिक्तसत्ताकत्वात् न पृथग्रूपेण भावाभावेषु उल्लिखितम्। प्राचीनकृतभावाभावपदार्थानां लक्षणेषु आत्माश्रयदोषवशात् लक्ष्य-लक्षणसंबन्ध-स्वरूपविचारमार्गेण अभिनवनिर्दोषलक्षणम् निरूपणीयम् इति नव्यानाम् अभिमतम्। तत्र दिगाकाशानुपाधिककालोपहितानुपूर्वीकत्वमिति अनुभवलक्षणम्। सानु-पूर्वीकत्वमित्यनेन पूर्वापरीभावमाचष्टे। अयं पूर्वापरीभावः ज्ञानप्रकारीभूतसंस्थानविशेषः वाग्व्यवहारकाले पदे वर्णानां समूहं रचयति। स्वरान्तं हि अक्षरम्। स्वर-व्यञ्जनयोः सानुपूर्वीकत्वं विना पदसार्थक्यं न सम्भवति। वर्णानां पदानां वाक्यानां स्वराणां च

सानुपूर्वीकत्वसंरक्षणेनैव प्रमाण- शब्दव्यवहारः जायते लौकिकेषु वैदिकेषु च। अथ केयम् आनुपूर्वी। उक्तं च तद्वर्णोत्तरं तद्वर्णोच्चारणम्। वर्णानामानुपूर्व्येण संनिवेशः। पा। पस्पशा। भा। इति वा। स च कालिकवृत्तिविशेषः पूर्वोत्तरभावविशिष्टः आनुपूर्व्य-आनुपूर्वी-भावः प्रातिशाख्येषु सविस्तारमुपपद्यते। सानुपूर्वीकत्वमित्यनेन पूर्वापरीभावमाचष्टे। अथ तत्र क्रमः फर्म् इत्यनयोः किं पार्थक्यम्। अत्र ब्रुमः-आनुपूर्व्य-आनुपूर्व्यी-भावः रेखाकल्पः विस्तारविशेषः फर्म्। क्रमस्तु सानुपूर्वीकानां भावपदार्थानां संस्थानम्। अस्मन्मते आनुपूर्वी आधाराधेय- भावापेतः कालघटित-धर्मविशेषः। अथ कालस्य अखण्डत्वेऽपि विभुत्वात् तथा सर्वमूर्तद्रव्यसंयोगप्रतियोगित्वात् तस्मिन् कथञ्चित् क्रियानुयोगित्वमपि कल्पितव्यम् तत्संयुक्तद्रव्याणां क्रियासमवायित्वात् - येन कालश्चलति तथा भूत-भविष्यत्-वर्तमानादि-कालव्यवहारा अपि स्वीक्रियन्ते। एवं सति चलनात्मकक्रियासंयोगित्वात् काले विभागे स्वीकृते अनवस्था दुष्परिहरा विभागज-विभागस्य आनन्त्यात्। एवं पाश्चात्यमते महामति-जेनो-कृतः विप्रतिपत्तिविशेषः यत् संयोगजन्यक्रियावत्त्वे सति विभागज-विभाग-सत्त्वात् कालस्य भूत-भविष्य-वर्तमानवृत्ति-परिपूर्णाकारः कदापि न सम्भवः अनवस्था च अवश्यंभाविनी। अत एव कालस्थितविषयानां व्यवहारसिद्ध्यर्थं संयोगविभागाद्यतिरिक्तः कश्चिद् वस्तुविशेषः पूर्वापरीभावप्रयोजकः स्वीकार्यः। स हि वस्तुविशेषः नव्यैः पयेन्ट् इति पदेन समाख्यातः। इन्दो-युरोपीयभाषावर्गे पुङ्क्त-धातुनिष्पन्नम् इदं पदं देवभाषायाम् पङ्क्ति पञ्च प्रपञ्च इत्यादिरूपेण प्राप्यते। एषां सर्वेषां वाच्यार्थे रेखा रेखिता विस्तारः इत्यादयः गृह्यन्ते। तथा हि मुख्यतः कालिक-पङ्क्तिः देशिक-पङ्क्तिः बौद्धिक-पङ्क्तिश्च स्वीकृताः। सानुपूर्वीकत्वं हि पङ्क्तिमत्त्वम्। तथा हि देशिक-पङ्क्तिः अनुभूतपदार्थसन्निविष्टा अनुभव-पदार्थसंबन्धानां प्रयोजिका। कालिक-पङ्क्तिः आत्मनिष्ठानुभूतगुणानां अनुभवानां च क्रमं विस्पष्टयति। बौद्धिक-पङ्क्तिस्तु केवलम् अनुभूतपदार्थानां तेषां संबन्धानां च आधारः भवति। आत्मनः अननुभूतगुणाः यथा विभुत्वं सर्वमूर्तसंयोगित्वं वा नित्यत्वम् उत्पादविनाशराहित्यम् अनुपादानत्वम् अनाश्रित-आश्रयत्वं वेति स्वाधिकरणव्याप्यवृत्तिमत्वात् अपङ्क्तिका इति परिगणिताः। अपि च उच्यते क्रियोपाधिकः कालः। सा च क्रिया क्षणमात्रमाश्रित्य व्यपदिश्यते। क्षणं हि कालविशेषम् अविनाशि। तथा सति तत्क्षणवृत्तिविषयाणां सत्ताऽपि अविनाशिनी भवितुमर्हति। प्रागभावाव्यवहितोत्तरक्षणवृत्तित्वे सति ध्वंसाभावाव्यवहितपूर्वक्षणवृत्तिविशिष्ट-अनुभवविषयाणां तत्क्षणमात्रवृत्तित्वात् तेषाम् अविनाशित्वं कल्पनीयम्। तत्क्षणस्य युगपत्प्रागभावध्वंसाभावप्रतियोगित्वात् अविनाशित्वं तन्निष्ठविषयाणं च। कालगता स्वाभाविकी क्रिया च स्पन्दात्मिका। कालस्पन्दात् जायते क्षणम्। अखण्डे काले क्षणमिति उपाधिग्रहणादेव तस्य सर्वव्यवहारहेतुत्वं संभवति। कालगतयावद्धर्माणामाश्रयत्वे

सत्यपि क्षणम् स्वयं गतिहीनं क्रमिकाक्रमिकोभयप्रकारकं भवति। क्षणगतक्रमिकत्वं तत्तत्क्षणवृत्तिज्ञानविषयैः निश्चीयते। अथवा कालानुक्रमज्ञानविषयवत्त्वात् क्षणं क्रमिकमिति वक्तुं शक्यते। निरुपाधिके काले स्वरूपसंबन्धावच्छिन्नत्वे सति तस्यैव अक्रमिकत्वमिति क्षणभङ्गवादः निरस्तः। तच्च क्षणं पुनः सावधिकं निरवधिकं च भवति। युगपत्प्रागभाव-ध्वंसाभावप्रतियोगित्वे सति तत्क्षणवृत्तिज्ञानविषयवत्त्वात् क्षणं सावधिकम् अक्रमिकं च भवति। स्वरूपतः निरुपाधिककालविशेषः इति निरवधिकं क्रमिकमित्यपि ग्राह्यम्। तथा हि आत्मगुणे ज्ञाने क्षणिकत्वमुपाधिः। तच्च औपाधिकं क्षणं विशेषणसापेक्षतया कालोपाधिकत्वात् सावधिकं निरवधिकं चेति अविरुद्धतया समं ग्राह्यम्। तत्क्षणवृत्तिज्ञानस्य व्याप्यवृत्तितया विभौ आत्मनि सर्वत्र संबन्धसत्त्वेऽपि शरीरावच्छेदे अणुपरिमाणमनःसंयुक्त-आत्मप्रदेशमात्रप्रकाशः सर्वानुभवसिद्धः। परन्तु ज्ञाने क्रमसत्त्वात् तज्ज्ञानाधारं क्षणं क्रमविशिष्टमिति आहार्यम्। तथा हि-दिगाकाश-अनौपाधिक-कालोपहित-सानुपूर्वीकत्वम् अनुभवत्वमिति अनुभवलक्षणम्। अनुभवश्च आत्मविशेष-गुणम्। स च अनुभवः स्वात्यन्ताभावाप्रतियोगित्वे सति आत्मनि व्याप्यवृत्तिः इति सिद्धान्तः। विषयभेदात् आत्मनि भूत-अनुभूत-अननुभूत-गुणत्रयविशिष्टत्वं जायते। अननुभूतगुणास्तु स्मृति-संस्कार-अदृष्ट-पाप-पुण्य-धर्माधर्मादयः अक्रमिकाः अज्ञातसत्ताकाश्च भवन्ति। ज्ञान-सुख-दुःख-इच्छा-द्वेष-सङ्कल्पादयः ज्ञातसत्ताकाः क्रमिकाः पङ्क्तिविशिष्टाः वा भवन्ति। सर्वेषां च गुणानां जन्यत्वात् भूतत्वम् इति साधर्म्यं तेषु वर्तते। अनुभूतत्वाननुभूतत्वं हि विभाजक-उपाधिमात्रम्। ततः ज्ञानाधिकरणमात्मा इत्येतन्मात्रलक्षणम्। न उपयोगि। पङ्क्तिविशिष्टानां क्रमिकानां वा यत् विरामोऽवसानं वा तेषां क्रमप्रयोजकं पयेन्द् इत्यनेनाभिधीयते तच्च अत्र उल्लिख्यमानं भवितुमर्हति। यथा- आपातविच्छिन्नयोः प्राणापानयोः मध्ये द्वौ विरामौ वर्तेते यत्र प्राणापानभिन्नौ कश्चित् विभाजकौ अवश्यं स्वीकर्तव्यौ। एवं कालिकपङ्क्तिविशिष्टानां ज्ञानानामन्तरे च।। तथा हि वस्तुमात्रं विन्दुः अथवा पयेन्द् इति मूलतत्त्वद्वयमेव स्वीकर्तव्यम्। अस्ति च तयोः विशेषः यत् वस्तु विन्दु च वस्तु-अनधिकरणम् भवतीति। एतच्च अवधारणीयं यत् वस्तुमात्रत्वेनैव पदार्थत्वं न सिध्यति। तदेव वस्तुमात्रम् आङ्गल-भाषायाम् एन्टिटि (Entity) इति पदेन बोद्धव्यम्। पयेन्द् विन्दु इत्यनेन च स्वरूपतः वस्तूनां विभाजकधर्माः एव बोद्धव्यम्। नैते विभाजकधर्माः द्रव्यादिवत् भावपदार्थाः न तदभावाः न वा तुच्छाः धर्ममात्रत्वात्। तथा हि वस्तु-विन्दु-समुच्चयं वस्तु-विभाजक-समुच्चयं वा जगत् इति आपद्यते। अयम् विन्दुविभाजकः वस्तूनां संबन्धप्रयोजकः। स हि संबन्धप्रयोजकः द्वयोः वस्तुनोः द्वन्द्वभावनियामकः। द्वन्द्वभावस्तु स्वरूपतः बौद्धिकद्वन्द्वभावः वस्तुषु औपचारिकः। परन्तु यावद्विश्वसापेक्षत्वात् द्वन्द्वभावप्रवर्तनायां वस्तूनां नास्ति कथमपि स्वातन्त्र्यमिति हि विशेषः। अथवा एतद्द्वन्द्वभावे सर्वं जगत् उपकारकमिति कल्पनीयम्। यथा

हस्त-पुस्तक-संयोगः। हस्त-पुस्तक-संयोग इति त्रयाणां पदार्थानां मध्ये सम्बन्धानुकूल्यविशेषसत्त्वे तदतिरिक्तानां विश्वस्य उपकारकत्वम् अवश्यमङ्गीकर्तव्यम्। संबन्धस्तु त्रिविधः स्वरूप-संयोग-समवायभेदात् धर्म-धर्मि-भावस्य संबन्धानुकूल्य-विशेषनिरूपितत्वाच्च। तत्र स्व-अधीनमात्रसंबन्धत्वं स्वरूपत्वम्। स्वभिन्न-अपर-सम्बन्ध-संबन्धि-भावात्यन्ताभाववत्त्वं वा। सम्बन्धान्तरेण असम्बन्धत्वे सति संबन्धत्वं स्वरूपत्वं पदार्थान्तर-अनपेक्षत्वे सति स्व-अधीनमात्रसम्बन्धत्वं वा। अस्ति स्वरूपतुल्यः द्वन्द्वभावग्राहयिता धर्मविशेषः। तच्च कन्टिग्युटि (Contiguity) इति आङ्ग्ल-पारिभाषिकशब्दविशेषेण उल्लिख्यते। तद्धर्मविशेषः कश्चित् बौद्धिकसम्बद्धत्वं बुद्धिमात्रग्राह्यसंबद्धत्वं वा बोधयति। अस्माभिः तु सर्वमेतत् पारिभाषिकशब्दनियततत्त्व-प्रकाशार्थं चित्रभाषा आश्रयित्वतव्या इति मतम्। अतः यथास्थानम् एतेषां चित्ररूपं प्रतिष्ठाप्यते।



तथा च सर्वमेतत् वैशेषिकनये पर्यवस्यते। कणादेन महर्षिणा तथैव दर्शनात् सूत्रितत्वाच्च नास्त्यत्र कश्चित् संशयः विरोधो वा। तत्र समवायः संबन्धान्तरानपेक्षः संयोग-स्वरूपातिरिक्तः संबन्धविशेषः स्वयमविभाज्यः विभाजकधर्मः अयुतसिद्धः कल्पितः। स समवायः द्रव्य-गुणयोः जाति-व्यक्त्योः द्रव्य-कर्मणोः अवयव-अवयविनोः व्यक्ति-विशेषयोः पञ्चविधद्वन्द्वभूतयोर्मध्ये नियमितः। स च संयोगसम्बन्धप्रयोजकः संयोगस्य द्रव्याश्रितगुणविशेषत्वात्। गणितशास्त्रे यथा कश्चित् स्थिरविन्दुः स्वीक्रियते यमाश्रित्य तदतिरिक्ताः पदार्थाः स्वस्थितिमालभते तथैव समवायमाश्रित्य सर्वे द्वन्द्वभावाः तन्निष्ठसंबन्धाश्च कल्प्यन्ते। तद्यथा – शिरोरूहे विन्यस्ते ब्रह्मरन्ध्रोपरि मेरुः दृश्यते शिखाबन्धप्रयोजकः तथैव समवायः स्वयमविकारी कूटस्थः अपरसम्बन्धप्रवर्तकः। अथवा कश्चित् देवदर्शनाभिलाषी प्रातः सप्तमघटिकायां पर्वतशीर्षम् आरोहणं कुर्वाणः सायं सप्तमघटिकायां शीर्षमुपलभ्य दर्शनान्तरं पुनः परदिवसे प्रातः सप्तमघटिकायाम् अवरोहणं कुर्वाणः सायं सप्तमघटिकायां सानुदेशमुपस्थितः। तस्य गमनागमनपथि एकः विन्दुः अवश्यमासीत् यत्र स चलदपि उभयदिवसे एकस्मिन्नेव क्षणे स्थितवान् आसीत्। अथवा भूतले कस्मिंश्चित् पटे विन्यस्ते तस्यैव आकुञ्चितदशायां

च एकः मेरुः अवश्यमस्ति यमाश्रित्य पट-भूतलयोः संयोगः प्रवर्तते। तदेव मेरुत्वं स्थिरविन्दुत्वं वा समवायस्वरूपे निहितमिति विहितम्। यथा घट-घटरूपयोर्मध्ये। पाकजरूपोत्पत्तिकाले च पूर्वरूपविनाश-अपरूपोत्पत्तिकाले च तदधिकरणे घटे क्षणमपि रूपहानिः न जायते। उत्पत्तिकाले परमाणौ च आद्यक्षणवृत्ति-रूपाभावः कदापि नास्ति इत्यस्माकम् आशयः। प्रलयकाले सर्वभावध्वंसे रूप-परमाणु-संबन्धेषु स्वरूपतः सत्स्वपि असंबद्धानां तेषां द्वन्द्वभावः न प्रवर्तते। ततः यत्र यत्र यत्कालव्याप्यस्य समवायस्य संयोगादिसंबन्धजातद्वन्द्वभावप्रवर्तकत्वं तत्तत्कालव्याप्यत्वमेव समवायस्य नित्यत्वम्। तथा हि स्वयमविभाज्यत्वे सति संयोगादिसंबन्धवृत्ति-अयुतसिद्धद्वन्द्वभाव-प्रयोजकविभाजकत्वं समवायत्वम् इति लक्षणम् अनाविलम्। संयोगस्य स्वरूपतः विभाज्यत्वात् संयोग-विभाग-उभयप्रयोजकत्वमेव अस्ति इति विशेषः। अतः विभाज्यत्वे सति संयोग-विभाग-उभयवृत्ति-विभाजकधर्मविशेषः संयोगसंबन्धः इत्येतत् चारुलक्षणम्। द्वौ स्वरूपसंबन्धौ एकस्मिन् समवाये पर्यवस्यते। विश्वं जगत् स्वरूपादिसंबन्ध-प्रतियोगिकम् इति स्वरूप-संयोग-समवाय-प्रतियोगिकत्वं हि जगतः लक्षणम्। ततः विश्वं जगत् एकस्मिन्नेव बिन्दौ मेरुभावं लभते सकलसंबन्धानाम् अभिन्नप्रतियोगित्वात्। संबन्धानां तु परस्परसाकांक्षत्वात् अनन्तविस्तारवशाच्च तेषाम् आनन्त्यमेव स्वीकार्यम्। तत्संबन्धपरिच्छित्तिजालं बीजाङ्कुरवत्-अनादि-अनन्त-जगत्-प्रवाह इति परिदृश्यते। अत्र रहस्यमेतद् यत् एकः पदार्थः नानासमवायप्रतियोगी भूत्वा महज्जगज्जालं रचयति इति नव्यानामाशयविशेषः प्राचीनैः नोल्लिखितम्। यद्यपि कणादकल्पितमेव वस्तुनिचयम् अनुचिन्तयद्भिः नव्यैः आकारतः धर्मधर्मिभावमवलम्ब्य वा उपस्थाप्यते एतत्पङ्क्तिकपदार्थलक्षणम्। तत्र जगदारम्भकपरमाणवः व्याप्यवृत्तिधर्माः। अव्याप्यवृत्तिधर्मवत्त्वस्वीकारे तद्धर्माणाम् अधिकरणभेदे समापन्ने परमाणोः सावयवत्वमपरिहार्यम्। तन्निरासार्थं तस्य पारिमाण्डल्यं दर्शितं येन सर्वमनाकुलम्। का अत्र युक्तिः। पारिमण्डल्यवशात् व्याप्यवृत्तिधर्मवत्त्वाच्च निरवयवं स्यात्। सावयवत्वे च मेरुसर्षपयोस्तुल्यपरिमाणत्वापत्तेः अवयवानन्त्यकल्पनात् गौरवः अनवस्था च दुष्परिहरा। परमाणुनिष्ठसंयोगः व्याप्यवृत्तिरेव। द्वयोः परमाण्वोः मध्ये यः संयोगः तन्निष्ठाधेयतानिरूपिताधारतावत्त्वात् तत्र औपाधिकः विभाजकः (Abstract Punctuator) कश्चिदनुभाव्यते। परमाणुलक्षणं तु नित्यमूर्तद्रव्यत्वे सति व्याप्यवृत्तिगुणवत्त्वं परमाणुत्वमिति। समवायित्वे सति असमवेतत्वं नित्यद्रव्यत्वम्। ननु व्याप्यवृत्तिगुणवत्त्वे अणुक-द्व्यणुकयोः परिमाणभेदः न स्यात् तथा हि त्रसरेणौ। उच्यते व्याप्यवृत्तिगुणवत्वे सत्येव परिमाणभेदः स्यात् द्वयोरणुकयोः संयोगवशात् उत्पन्ने द्यणुके अभिनव-अवयविनि अभिनवपरिमाणोत्पत्तेः। अपि च तत्रैव आधार-आधेयभावः अवयव-अवयविभावः प्रभृतयः भावप्रत्ययाः एकस्मिन्नेव धर्मिणि औपाधिकधर्माः विभाजकाः संनिविशन्ते। जलपरमाणुनिष्ठ-आधारतानिरूपक-शुक्लरूपम् स्यन्दमानम्

अविभज्यमानमेव तिष्ठति न वा। वस्तुगत्या रूपिणि एकस्यैव अवयविनः अनुभवात् तद्गतावयवानां भेदे सत्त्वेऽपि अवयविभेदः न स्यात्। तथा हि आधाराधेयभाववशात् भेदे सिद्धेऽपि शुक्लोऽयम् इति व्यवहारः औपाधिकः। भावप्रत्ययानां च अयं विशेषः यत् तेषु सिद्धे समवायादिसंबन्धे स्वसंबद्धविषये यावत्संबन्धयोग्यत्वम् आपतति येन जगज्जालं विस्तार्यते। अवयविनस्तु समवायमाश्रित्य स्वावयवाधिकरणकाः भवन्त्येव। चतुर्विधाः अवयविनः। तद्यथा– स्वेदज-अण्डज-उद्भिज-जरायुजाः। तत्र नित्यद्रव्यभिन्नत्वे सति संयोगविभागनिमित्तत्वम् असमवायिकारणत्वमिति भाषापरिच्छेद-कारमतम् अङ्गीकार्यम्। समवायित्वे सति असमवेतत्वम् नित्यद्रव्यत्वम्। तद्भिन्नत्वम् अनित्यत्वम्। नित्यद्रव्यभिन्नत्वे सति संयोगविभागकारणीभूताः पदार्थाः क्रियाः। क्रियाजन्यसंयोगविभागवन्तः परमाणवः। सा च परिस्पन्दात्मिका क्रिया। अन्या च गमन-आगमन-आकुञ्चन-प्रसारण-ऊर्ध्वगमन-अधोगमनादि-अनुकूल-संयोग-विभाग-अन्यतरसंबन्धात्मिका भवति। एकमात्रपदार्थसमवेतत्वे सति असमवायित्वम् विशेषत्वम्। अनेकसमवेतत्वे सति असमवायित्वं जातित्वं सामान्यं वा। स्वभिन्नानधिकरणत्वे सति स्वसमवेतत्वम् अन्त्यावयवित्वम्। व्याप्याव्याप्योभयवृत्तिगुणसमवायित्वम् आत्मत्वम्। दव्यनधिकाव्याप्यवृत्तिधर्मवत्त्वं कालत्वम् अव्यासज्यवृत्तिधर्मकत्वं वा। दिक् च व्यासज्यवृत्तिधर्मसमवायित्वम्। आत्मसमवेतजीवत्वप्रयोजकसंयोगवत्त्वं मनः। एतद्भिन्नत्वं गुणत्वम्। इति संज्ञाप्रकरणम्।।